श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः
श्री रङ्गनाथदिव्यमणिपादुकाभ्यां नमः

श्रीकवितार्किकसिंहस्य सर्वतन्त्रस्वतन्त्रस्य
श्रीमद्वेङ्कटनाथस्य वेदान्ताचार्यस्य कृतिषु
श्रीरङ्गनाथपादुकासहस्रे

# ॥ यन्त्रिकापद्धतिः षड्विंशी ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्री रङ्गनाथदिव्यमणिपादुकाभ्यां नमः

# ॥ यन्त्रिकापद्धतिः षड्विंशी ॥

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि ॥

उदग्रयन्त्रिकां वन्दे पादुकां यन्निवेशनात्।
उपर्यपि पदं विष्णोः प्रत्यादिष्टप्रसाधनम् ॥ **26.1** ॥

प्रसभं प्रतिरुध्य कण्टकादीन् भवती शौरिपदाम्बुजादधस्तात्।
चरणावनि ! धारयत्यमुष्मिन् उचितच्छायमुपर्यपि प्रतीकम् ॥ **26.2** ॥

मुरभिन्मणिपादुके ! त्वदीयाम्
अनघामङ्गुलियन्त्रिकामवैमि।
स्वयमुन्नमितां प्रदेशिनीं ते
परमं दैवतमेकमित्यृचन्तीम् ॥ **26.3** ॥

स्वदते मणिपादुके ! त्वदीया
पदशाखायुगयन्त्रिका विचित्रा।
परमं पुरुषं प्रकाशयन्ती
प्रणवस्येव परेयमर्धमात्रा ॥ **26.4** ॥

अनुयातमनोरथा मुरारेः
भवती केळिरथश्रियं दधाति।
चरणावनि ! यन्त्रिका तवैषा
तनुते कूबरसम्पदं पुरस्तात् ॥ **26.5** ॥

शङ्के भवत्याः सुभगं प्रतीकं
रङ्गेशपादाङ्गुळिसङ्ग्रहार्थम्।
त्राणाय पादावनि ! विष्टपानाम्
आज्ञाकरीमङ्गुळिमुद्रिकां ते॥ **26.6** ॥

अलङ्कृतं कर्णिकयोपरिष्टात्
उदग्रनाळं तव यन्त्रिकांशम्।
पद्मापतेः पादसरोजलक्ष्म्याः
प्रत्येमि पादावनि ! केळिपद्मम्॥ **26.7** ॥

उपरि विनिहितस्य केशवाङ्घ्रेः
उपरि पदावनि ! यन्त्रिकात्मिका त्वम्।
इति तव महिमा लघूकरोति
प्रणतसुरेश्वरशेखराधिरोहम्॥ **26.8** ॥

नित्यं पदावनि ! निबद्धकिरीटशोभं
पद्मालयापरिचितं पदमुद्वहन्त्याः।
अङ्गीकरोति रुचिमङ्गुळियन्त्रिका ते
साम्राज्यसम्पदनुरूपमिवातपत्रम्॥ **26.9** ॥

प्रथमा कलेव भवती चरणावनि ! भाति रङ्गचन्द्रमसः।
शृङ्गोन्नतिरिव यत्र श्रियं विभावयति यन्त्रिकायोगः॥ **26.10** ॥

॥ इति श्रीकवितार्किकसिंहस्य सर्वतन्त्रस्वतन्त्रस्य
श्रीमद्वेङ्कटनाथस्य वेदान्ताचार्यस्य कृतिषु
श्रीरङ्गनाथपादुकासहस्रे यन्त्रिकापद्धतिः षड्विंशी ॥

कवितार्किकसिंहाय कल्याणगुणशालिने।
श्रीमते वेङ्कटेशाय वेदान्तगुरवे नमः॥